# श्री जैनरक्षा स्तोत्रम्

श्रीजिनं भक्तितो नत्वा त्रैलोक्याह्लादकारकम् | |

जैनरक्षामहं वक्ष्ये देहिनां देहरक्षकम् ||१||

ॐ ह्रीं आदीश्वरः पातु शिरसि सर्वदा मम |

ॐ ह्रीं श्री अजितो देवो भालं रक्षतु सर्वदा||२||

नेत्रयोः रक्षको भूयात् ॐ आं क्रौं सम्भवो जिनाः|

रक्षेद् घ्राणेन्द्रिये ॐ ह्रीं श्रीं क्लीं ब्लूं अभिनन्दनः ||३||

सुजिह्वे सुमुखे पातु सुमतिः प्रणवान्वितः |

कर्णयोः पातु ॐ ह्रीं श्री रक्तः पद्मप्रभः प्रभुः || ४ ॥

सुपार्श्वः सप्तमः पातु ग्रीवायां ह्रीं श्रियाश्रितः |

पातु चन्द्रप्रभः श्रीं ह्रीं क्रीं (क्रों) पूर्वस्कन्धयोर्मम ||५||

सुविधिः शीतलो नाथो रक्षको करपंकजे |

ॐ क्षां क्षीं क्षं युतौ कामं चिदानन्दमयौ शुभौ || ६ ||

श्रेयांसो वासुपूज्यश्च हृदये सदयं सदा ।

भूयाद् रक्षाकरो वारं वारं श्री प्रणवान्वितः ।।७।।

विमलोऽनन्तनाथश्च मायाबीजसमन्वितौ ।

उदरे सुन्दरे शाश्वद् रक्षायाः कारकौ मतौ ।।८।।

श्री धर्मशान्तिनाथौ च नाभिपंके रुहे सताम् ।

ॐ ह्रीं श्रीं क्लीं हं संयुक्तौ पुनः पातां पुनः पुनः।।९।।

श्री कुन्थु-अरनाथौ तु सुगुरु सुकटीतटे ।

भवेतामवकौ भूरि ॐ ह्रीं क्लीं सहितौ जिनौ ।।१०।।

मे पातां चारु जंघायां श्री मल्लिमुनिसुव्रतौ ।

ॐ ह्रां ह्रीं हूं ततो ह्रः ब्लूं क्लीं श्रीं युक्तौ कृपाकरौ।। ११॥

यत्नतो रक्षकौ जानू श्री नमिनेमिनाथको ।

राजराजीमतीमुक्तौ प्रणवाक्षरपूर्वकौ ।। १२ ।।

श्री पार्श्वेशमहावीरौ पातां मां हों सुमानदौ ।

ॐ ह्रीं श्रीं च तथा भुं क्लीं हां हः श्रां श्रः युतौ जिनौ ।।१३।।

रक्षाकरा यथास्थाने भवन्तु जिननायकाः ।

कर्मक्षयकरा ध्याता भीतानां भयवारकाः । । १४ । ।

जैनरक्षां लिखित्वेमां मस्तके यस्तु धारयेत् ।

रविवद् दीप्यते लोके श्रीमान् विश्वप्रियो भवेत् ।। १५ ।।

तस्योग्र रोगवेतालाः शाकिनीभूतराक्षसाः ।

एते दोषा न दृष्यन्ते रक्षकाश्च भवन्त्यमी ।। १६ ।।

अग्निसर्पभयोत्पाता भूपालाश्चोर विग्रहाः ।

एते दोषा प्रणश्यन्ति रक्षकाश्च भवन्त्यमी ।। १७।।

जैनरक्षामिमां भक्त्या प्रातरुत्थाय यः पठेत् ।

इच्छितान् लभते कामान् सम्पदश्च पदे पदे ।।१८।।

श्रावण शुक्लगेऽष्टम्यां प्रारभ्य स्तोत्रमुत्तमम् ।

अभिषेकं जिनेन्द्राणां कुर्याच्च दिवसाष्टकम्।।१९।।

ब्रह्मचर्यं विधातव्य मेकभुक्तं तथैव च ।

शुचिता शुभ्रवस्त्रेण वालंकारेण शोभनम् ।।२०।।

नरो वापि तथा नारी शुद्धभावयुतोऽपि सन् ।

दिनं दिनं तथा कुर्यात् जाप्यं सर्वार्थसिद्धये ।।२१।।

एकायां तु विधातव्यम् उद्यापनमहोत्सवम् ।

पूजाविधिसमायुक्तं कर्तव्यं सज्जनैर्जनैः ।। २२ ।।

।। इति जैन रक्षा स्तोत्रम् ।।

।। द्वितीय अध्याय समाप्त ।।